तृतीयः पाठः

3


Lesson – 3

# पम्पावर्णनम्

रामस्य अयनं (चरितं) रामायणम्। रामायणम् आदिकाव्यम् इति प्रसिद्धम्। अस्मिन् ग्रन्थे चतुर्विंशतिसहस्रश्लोकाः (24,000) सन्ति। एते श्लोकाः बाल – अयोध्या – आरण्य – किष्किन्धा – सुन्दर – युद्ध- उत्तर इति सप्तकाण्डेषु विभक्ताः सन्ति। अस्मिन् ग्रन्थे प्रकृतेः वर्णनम् सौन्दर्येण वर्णितम् अस्ति। तत्रापि नदीनां वर्णने पम्पायाः वर्णनं अति चमत्कारं जनयति। तदेव अत्र पाठ्यविषयत्वेन वर्तते।

सौमित्रे! शोभते पम्पा वैडूर्यविमलोदका।
फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः॥ 1

सौमित्रे! पश्य पम्पायाः काननं शुभदर्शनम्।
यत्र राजन्ति शैलाभा द्रुमाः सशिखरा इव॥ 2





Unit 3.indd 17 06-06-2018 12:38:22

शोकार्तस्यापि मे पम्पा शोभते चित्रकानना ।
व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा ।। 3

नलिनैरपि संछन्ना ह्यत्यर्थं शुभदर्शना ।
सर्पव्यालानुचरिता मृगद्विजसमाकुला ।। 4

अधिकं प्रतिभात्येतत् नीलपीतं तु शाद्वलम् ।
द्रुमाणां विविधैर्पुष्पैः परिस्तोमैरिवार्पितम् ।। 5

इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वशः ।
नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ।। 6

एषा प्रसन्नसलिला पद्मनीलोत्पलायिता ।
हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता ।। 7

जले तरुणसूर्याभैः षट्पदाहतकेसरैः ।
पङ्कजैः शोभते पम्पा समन्तात् अभिसंवृता ।। 8

चक्रवाकयुता नित्यं चित्रप्रस्थवनान्तरा ।
मातङ्गमृगयूथैश्च शोभते सलिलार्थिभिः ।। 9

पवनाहतवेगाभिः ऊर्मिभिः विमलेऽम्भसि ।
पङ्कजानि विराजन्ते ताड्यमानानि लक्ष्मण ।। 10

(श्रीमद्-रामायणे किष्किन्धाकाण्डे प्रथमः सर्गः)

**कविपरिचयः** श्रीमद्-रामायणस्य कर्ता महर्षिः वाल्मीकिः। अयम् आदिकविः इति प्रसिद्धः। अयं ब्रह्मणः आज्ञया नारदमुखात् रामकथां श्रुत्वा रामायणम् अरचयत् ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. द्रुमः - tree
2. काननम् - forest
3. व्यालः - snake
4. मतङ्गः - elephant



Unit 3.indd 18 06-06-2018 12:38:22

5. षट्पदः - bee

6. ऊर्मिः - waves

7. पङ्कजः - lotus

8. शिखराः - peaks

9. उदकम् - water

10. मृगः - deer

11. अम्भः - water

12. पवनः - wind

13. शैलः - mountain

14. उत्पलम् - lilly

## II. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. राजन्ति – लट् - प्रथमपुरुषः, बहुवचनम् of राज् to shine
2. शोभते – लट् - आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of शोभ् to shine
3. प्रतिभाति – लट् – प्रथमपुरुषः, एकवचनम् of भा with प्रति to shine
4. इमानि – इदं शब्दस्य नंपुसकलिङ्गे प्रथमाविभक्तिः, बहुवचनम्
5. पश्य – लोट् – मध्यमपुरुषः, एकवचनम् of दृश् to see.
6. प्रकाशन्ते – लट् – आत्मनेपदी, प्रथमपुरुषः, बहुवचनम् of प्रकाश् to shine
7. एषा – एतद् शब्दस्य स्त्रीलिङ्गे प्रथमाविभक्तिः, एकवचनम्
8. समन्तात् – Indeclinable (अव्ययम्), meaning everywhere.

## III. अधो लिखितानां पदानां विग्रहं लिखत-

1. सौमित्रे - ____________________
2. शोकार्तः - ____________________
3. नीलोत्पलम् - ____________________
4. पङ्कजम् - ____________________
5. शुभदर्शनम् - ____________________
6. शीतोदकम् - ____________________
7. सौगन्धः - ____________________
8. षट्पदाः - ____________________
9. चित्रकाननम् - ____________________

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत -

1. विविधैर्द्रुमैः - विविधैः + द्रुमैः
2. शीतोदकम् - शीत + उदकम्
3. प्रतिभात्येतत् - प्रतिभाति + एतत्
4. मृगयूथैश्च - मृगयूथैः + च
5. विमलेऽम्भसि - विमले + अम्भसि
6. अत्यर्थम् - अति + अर्थम्
7. इवार्पितम् - इव + अर्पितम्
8. पद्मोत्पलवती - पद्म + उत्पलवती
9. नलिनैरपि - नलिनैः + अपि
10. सलिलार्थिभिः - सलिल + अर्थिभिः

## V. अधो निर्दिष्टानां पदानां पर्यायपदानि लिखत-

1. द्रुमः - वृक्षः, तरुः
2. काननम् - अरण्यम्, वनम्
3. व्यालः - नागः, सर्पः
4. मतङ्गः - इभः, गजः
5. षट्पदः - मधुकरः, मधुपः
6. ऊर्मिः - तरङ्गः, वीचिः
7. पङ्कजः - पद्मम्, सरोरुहम्
8. शिखराः - शृङ्गाः, तुङ्गाः
9. उदकम् - वारि, जलम्, तोयम्
10. मृगः - कुरङ्गः, हरिणः
11. पवनः - वायुः, अनिलः
12. शैलः - पर्वतः, अचलः
13. उत्पलम् - कुमुदम्
14. सूर्यः - अर्कः, इनः

## VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत -

1. विमलम् × कलुषम्
2. शुभम् × अशुभम्
3. एकधा × बहुधा
4. शीतम् × उष्णम्
5. अधिकम् × न्यूनम्
6. सुगन्धम् × दुर्गन्धम्
7. तरुणम् × अतरुणम्
8. नित्यम् × अनित्यम्

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम् -

1. रामायणे कति काण्डानि सन्ति ?
2. रामायणस्य कस्मिन् काण्डे पम्पावर्णनं विद्यते ?
3. कीदृशी पम्पा शोभते ?
4. कानने किं राजन्ति ?
5. “शोकार्तस्यापि मे पम्पा शोभते” – कः कं प्रति उवाच ?

6. पम्पायां किम् अधिकं प्रतिभाति ?

7. नलिनानि कथं प्रकाशन्ते ?

8. "पङ्कजैः शोभते पम्पा" – विवृणुत।

## VIII. सविस्तरम् उत्तरत-

1. यथाग्रन्थं पम्पां वर्णयत।

## IX. अधो लिखितानां श्लोकानां पूरणं कुर्वन्तु-

1. शोकार्तस्यापि ________ शोभते चित्रकानना ।

   व्यवकीर्णा __________ शीतोदका शुभा ॥

2. इमानि ________ पश्य लक्ष्मण सर्वशः ।

   नलिनानि प्रकाशन्ते जले ________ ॥

3. ________ नित्यं चित्रप्रस्थवनान्तरा ।

   मातङ्गमृगयूथैश्च शोभते __________ ॥

4. सौमित्रे ! शोभते पम्पा _________ ।

   ___________ शोभिता विविधैर्द्रुमैः ॥

5. जलं ___________ षट्पदाहतकेसरैः ।

   _____ शोभते पम्पा समन्तात् अभिसंवृता ॥

## X. विशेषणानि विशेष्यैः सह योजयत-

| | विशेष्यम् | - | विशेषणम् |
|---|---|---|---|
| 1. | काननम् | - | पवनाहतवेगाभिः |
| 2. | नलिनानि | - | वैडूर्यविमलम् |
| 3. | उदकम् | - | शुभदर्शनम् |
| 4. | पम्पा | - | शुभगन्धीनी |
| 5. | ऊर्मिभिः | - | फुल्लपद्मोत्पलवती |

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### अयं रामायणग्रन्थः विश्वभाषासु अनूदितः भवति ।

| भाषा | ग्रन्थस्य नाम | ग्रन्थकर्ता |
|---|---|---|
| द्रविडभाषा | कम्बरामायणम् | Kambar |
| हिन्दी | रामचरितमानस् | Thulasidas |
| तेलुगु | रङ्गनाथ रामायणम् | Gona Buddha Reddy |
| मळयालम् | अध्यात्मरामायणम् | Thunchaththu Ramanujan Ezhuthachan |
| कन्नड | श्रीरामायणदर्शनम् | Kuvempu |

### कविकोकिलः वाल्मीकिः:-

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।

वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ।। इति श्लोकेन वाल्मीकिरेव रामायणस्य प्रणेता इति ज्ञायते।

यदा सः तपसि स्थितः, तदा तस्य उपरि वल्मीकम् अभवत्। वल्मीकान्तरितः सः महता कालेन ततः निर्गतः इत्यनेन तस्य वाल्मीकिरिति नाम अन्वर्थम् अभवत्।

कूजन्तं राम रामेति मधुरं मधुराक्षरम्।

आरुह्य कविता-शाखां वन्दे वाल्मीकि-कोकिलम्।।

वाल्मीकिः काव्यकानने राम-रामेति मधुरं कूजन् कलरवरुचिरः कोकिल इति संस्मर्यते सूरिभिः। स एव आदिकविः, तस्य रामायणम् आदिकाव्यमिति च प्रसिद्धम्।

अद्यत्वे सप्तकाण्डात्मकं श्रीमद्रामायणम्। पुनश्च चतुर्विंशतिसहस्रश्लोघटितं पञ्चशतसर्गघटितञ्च। एतस्य सप्तकाण्डानि क्रमशः बालकाण्डम्, अयोध्याकाण्डम्, अरण्यकाण्डम्, किष्किन्धाकाण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम्, उत्तरकाण्डञ्च सन्ति।

बालकाण्डे रामजन्मतः रामविवाहपर्यन्तम्, अयोध्याकाण्डे रामराज्याभिषेकप्रसङ्गेन सह तस्य अकस्मात् वनगमनम्, अरण्यकाण्डे पञ्चवट्याः वर्णनं, खरदूषणवधं, किष्किन्धाकाण्डे हनूमानस्य समुद्रसन्तरणम्, सुन्दरकाण्डे लङ्कावर्णनं, हनुमानेन अशोकवाटिकायां सीतादर्शनं, लङ्कापुरीदाहनं च, युद्धकाण्डे सेतुनिर्माणम्, युद्धे रावणहननम्, सीतासम्प्राप्तिः, राज्याभिषेकश्च, उत्तरकाण्डे सीतापरित्यागः, लवकुशयोः रामेण सह सम्मिलनं, सीतायाः पृथिव्यां प्रवेशः च वर्णिताः विलसन्ति।।

Weblink : 1. https://en.in.wikipedia.org/wiki/Pambai

2. https://sa.in.wikipedia.org/wiki/Valmiki

2. https://sa.in.wikipedia.org/wiki/Ramayanam



Unit 3.indd 22 06-06-2018 12:38:23